
Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:10(5), October, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

# पञ्चमहाकाव्यानाम् आद्यन्तश्लोकयोर्विवेचनम्

**आचार्यः के. राजगोपालन्**
आचार्यः, साहित्यविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः, आन्ध्रप्रदेशः

## रघुवंशम्

आदिमः श्लोकः

**वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये। जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥**[1]

प्रसिद्धोयं श्लोकः संस्कृतकाव्यजगति। अत्र प्रायिकश्चोपमालंकारः कालिदासोक्तकाव्यादौ भूदेवताकस्य सर्वगुरोर्मगणस्य प्रयोगाच्छुभलाभः सूच्यते। तदुक्तम्-शुभदो मो भूमिमयः इति। वकारस्य अमृतबीजत्वात् प्रचयगमनादिसिद्धिरिति मल्लिनाथः अस्य श्लोकस्य माङ्गल्यं प्रतिपादयति।

अत्र विचार्यते यदि तर्हि अवधेयं यत् कालिदासकृतकाव्यानाम् आदिश्लोकाः यदि दृश्यन्ते तत्र कुमारसम्भवे **"अस्त्युत्तरस्या"**मिति, मेघदूते **"कश्चित्कान्ताविरहगुरुणा स्वाधिकारा"**दिति ऋतुसंहारे **"प्रचण्डसूर्यस्स्पृहणीयचन्द्रमा"** इति अभिज्ञानशाकुन्तले नाटके च **"या सृष्टिस्स्रष्टुराद्या"** इति प्रारम्भश्लोका वर्तन्ते। तेषु साक्षात्कथाया आरम्भः क्रियते। नाटके तावत् नाटकसम्प्रदायस्य पालनं क्रियते। काव्येषु न तथा। परं रघुवंशमहाकाव्यारम्भे प्रार्थना दृश्यते साक्षात्। छन्दस्ताव**दनुष्टुप्**।

प्रायः अत्र अनुमीयते यत् कालिदासस्य काव्येषु रघुवंशमादिमं स्यादिति। यतः दशसु श्लोकेषु कालिदासः वक्षयमाणस्य रघूणां चरितस्य सारं वदन् तेषां चरित्रचत्रणे स्वसाहसमनुमोदयन् सन्तः तं श्रोतुमर्हन्तीति प्रार्थयति। कालिदासस्य आदिमा रचना केति प्रश्ने कृते सति **"अस्ति कश्चित् वाग्विशेषः"** इति दन्तकथामाधारं मत्वा कुमारसम्भवं प्रथममिति प्रतिपादयन्ति। तथा नेत्यत्र विविच्यते। कालिदासस्य कृतीनां स्मरणाय तावदियं कथा प्रसृतेति भाति। तत्र तर्कसम्बद्धता नास्ति। यदि तत्र स्यादिति कथ्यते तर्हि सपदि काव्यद्वयोरपि रचना कृता स्यादित्यपि कथनीयम्।

तथा न युक्तिपूर्णं चिन्तयामः। यदि रचनाशैलिं परिशीलयाम आदौ रघुवंशेऽत्र ताव**दनुष्टुपः** प्रयोगः। अन्यत्र कुमारसम्भवे **इन्द्रवज्रा**[2]-**उपेन्द्रवज्रयोः**[3] जातिः मेघदूते **मन्दाक्रान्ता** ऋतुसंहारे **वंशस्थः** इत्येवं वृत्तानां प्रयोगो दृश्यते। यदि रघुवंशमहाकाव्यमेव परिशीलयामः तत्र प्रथमः सर्गः **अनुष्टुप्छन्दसि**[4] द्वितीयः सर्गः **उपजातौ** तथा च तृतीयः सर्गः **वंशस्थे**[5] रचितः दृश्यते। अमुमेव क्रममनुसृत्य कुमारसम्भ**वमुपजात्या** प्रारभते। ऋतुसंहारं **वंशस्थे**नारभते। अत्यन्तं लघुकाव्यं मेघदूतं **मन्दाक्रान्ताछन्दसा** आरभते यच्च रघुवंशस्य अन्तिमे सर्गे अन्तिमे श्लोके प्रयुज्यते।

दन्तकथाया अपेक्षया क्रमोऽयं तर्कसंयुतः दृश्यते। अन्यत्तु विद्वद्भिः समालोचनीयम्। सामान्यं यदि वितर्कयामः यदादौ

---

1 र.वं. १/१
2 ततजगग
3 जतजगग
4 पञ्चमं लघु सर्व्वत्र सप्तमं द्विचतुर्थयोः। गुरु षष्ठन्तु पादानां शेषेष्वनियमो मतः॥ इति छन्दोमञ्जरी।
5 जतजर

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:10(5), October, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

कोऽपि कविरनुष्टुपा हि काव्यमारभते वाल्मीकिमनुसरन् यतः नियमातिशयाभावात् प्रसिद्धत्वात् सौलभ्याच्च। तावदेव न अन्यत्र काव्येषु वस्तुनिर्देशेन काव्यमारभते कालिदासः। अत्र तु दश श्लोकाः कथारम्भस्य समर्थने प्रस्तावनारूपेण कृताः दृश्यन्ते। तस्मात् सिद्ध्यति यत् कालिदासस्यादिमं काव्यमेतदेवेति।

तथा च **वागर्थाविवसम्पृक्तौ जगतः पितरौ वागर्थप्रतिपत्तये वन्दे।** इति प्रार्थनायां वागर्थौ नाम तयोः नित्यसम्बन्धात् काव्यमेवेति स्पष्टमवगम्यते। तस्मात् काव्यकरणाय समुद्यतोहं काव्यस्वरूपौ जगतः पितरौ वन्दे इति कालिदासः काव्यारम्भे पार्वतीपरमेश्वरौ स्तौतीति तर्केणापि काव्यमिदम् कालिदासस्य आदिममिति सङ्केतेन अवगम्यते। यतः काव्यान्तरेषु प्रार्थना न विद्यते इति हेतोः।

विवेचनं तावदत्र विहितं वर्तते। पुनस्तत्र **"तं सन्तो वेत्तुमर्हन्ति सदसद्व्यक्तिहेतवः"**[6] इत्युक्त्वा विरम्यते। विवादाय च नायं विषयः केवलं विवेचनायैव।

अन्तिमश्लोकः (उपसंहारः)

**तं भावार्थं प्रसवसमयाकाङ्क्षिणीनां प्रजानामन्तर्गूढं क्षितिरिव नभोबीजमुष्टिं दधाना।**

**मौलैः सार्धं स्थविरसचिवैर्हेमसिंहासनस्था राज्ञी राज्यं विधिवदशिषद्भर्तुरव्याहताज्ञा ॥**[7]

इति। श्लोकोऽयं **मन्दाक्रान्ता**वृत्ते[8] वर्तते। पत्युः अग्निवर्णस्य मरणस्यानन्तरं गर्भिण्याः राज्ञ्याः राज्याभिषेकः मन्त्रिभिः क्रियते। सा च प्रजानां भावाय भूतये स्वपुत्रस्य च प्रसूतये निरीक्षमाणा विधिवत्प्रजापालनं चकारेति कथनेन महाकाव्यं सम्पूर्णतां एति। अत्र ग्राह्यमेतद् स्त्रीणामपि राज्यपालनाधिकारः रामायणस्य काल एव दृश्यते। तदपि गर्भिण्याः राज्याभिषेकः। नाम समाजे विद्यायां वा कर्मसु वा लिङ्गभेदो नावर्तत इति। सा राज्यमशिषद् अव्याहताज्ञा। नाम तस्याः राज्यपालने वृद्धाः मौलमन्त्रिणश्च सुष्ठु सहकारमकुर्वन्निति। तथा च राज्ञि दिवङ्गते राज्यस्य अतिक्रमणमपि न विहितम् मन्त्रिसेनाधिपतिभिः। नाम प्रजानां धर्मपालनस्य उदाहरणमिदमत्र।

## कुमारसम्भवम्

**आदिमः श्लोकः**

**अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः।**

**पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः॥**

अस्तीति क्रियया प्रारम्भः। अत्र मङ्गलाचरणसूचकः शब्दः इव न दृश्यते। कालिदासस्य काव्यकरणचमत्कृतिरत्र बिम्बते। आशीर्वा नमस्क्रिया वा तत्र नास्ति। वस्तुनिर्देशेन काव्यारम्भः दृश्यते।[9] हिमालयवर्णनेन काव्यस्यारम्भस्तत्रापि आख्यातपदेन प्रारम्भो हिमालयस्य शोभां सुश्लोकयति द्रढयति च। अद्याप्यस्य श्लोकस्य पठनेन श्रवणेन च हिमालयः कथं

[6] तं सन्तः श्रोतुमर्हन्तीति पाठोऽत्र अनुकृतः। (र.वं १/१०)
[7] र.वं. १९/५७
[8] मभनततगग
[9] सर्गबन्धो महाकाव्यमुच्यते तस्य लक्षणम्। आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्॥ (काव्यादर्शः १/१४)

Cover Page
INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:10(5), October, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

स्थितः इति वर्तमाने कालेप्यनुवर्तितं भवति भविष्यति च कालेऽपीत्थं ह्यनुवर्तिष्यते। एतत्सम्भवति ‘अस’ धातोर्लटि प्रयोगकारणादेव। कालिदासोऽनेनैकेन प्रयोगेण श्लोकममुं चिरस्थायिनञ्चकारेत्यत्र नास्ति वचनान्तरम्। न केवलं कुमारसम्भवे क्रियया प्रारभते कथा पञ्चतन्त्रे कादम्बर्यां भट्टिकाव्ये अपि तथैव दृश्यते।

**अन्तिमः श्लोकः**

**समदिवसनिशीथं सङ्गिनस्तत्र शम्भोः शतमगमदृतूनां साग्रमेका निशेव।**

**न तु सुरतसुखेषु छिन्नतृष्णो बभूव ज्वलन इव समुद्रान्तर्गतस्तज्जलेषु॥**[10]

मालिनी[11] छन्दः। प्रायः सर्वेऽपि सर्गाः मालिनीछन्दसा समापिताः द्वित्रान् विहाय। शिवपार्वत्योः सङ्गमः बहुकालं यावदभवद्। तस्य शम्भोः तृष्णा समुद्रन्तर्गतः ज्वलनः तज्जलेन यथा न शान्तिं याति तथा अवर्तत इति समापयति। अत्र केचन काव्यमिदं सप्तदशसर्गात्मकं मन्यन्ते। अष्टौ कालिदासस्य कृतयः इतरे च अन्येषामिति केचन।

## किरातार्जुनीयम्

**आदिमः श्लोकः**

**श्रियः कुरूणामधिपस्य पालनीं प्रजासु वृत्तिं यमयुङ्क्त वेदितुम्।**

**स वर्णिलिङ्गी विदितः समाययौ युधिष्ठिरं द्वैतवने वनेचरः॥**

वंशस्थवृत्ते वर्तते अयं श्लोकः। श्रियः इति मङ्गलाचरणपूर्वकेन पदेन काव्यस्यारम्भः क्रियते। **“अथ तत्रभवान्भारविनामा कविः ‘काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये। सद्यः परनिर्वृतये कान्तासंमिततयोपदेशयुजे॥' इत्याद्यालंकारिकवचन प्रामाण्यात्काव्यस्यानेकश्रेयःसाधनताम्, 'काव्यालापांश्च वर्जयेत्' इति निषेधशास्त्र स्यासत्काव्यविषयतां च पश्यन्किरातार्जुनीयाख्यं महाकाव्यं चिकीर्षुश्चिकीर्षितार्था विघ्नपरिसमाप्तिसंप्रदायाविच्छेदलक्षणफलसाधनत्वात् 'आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्' इत्याद्याशीर्वादाद्यन्यतमस्य प्रबन्धमुखलक्षणत्वाच्च वनेचरस्य युधिष्ठिरप्राप्तिरूपं वस्तु निर्दिशन्कथामुपक्षिपति।”** इति मल्लिनाथः व्याख्यादौ। तथा च काव्ये राजकीयः विषयः आदौ कथ्यते प्रस्तावनायां नाम काव्यं तावद् राजकीयं भवतीत्यपि ग्राह्यम्।

**अन्तिमः श्लोकः**

**व्रज जय रिपुलोकं पादपद्मानतः सन्गदित इति शिवेन श्लाघितो देवसंघैः।**

**निजगृहमथ गत्वा सादरं पाण्डुपुत्रो धृतगुरुजयलक्ष्मीर्धर्मसूनुं ननाम॥**[12]

मालिनीवृत्ते[13] वर्तते। अत्र कवेराशीः नास्ति परं देवैः कृता आशीर्वर्तते। विजयोऽस्तु इति भावेन सर्गः तथा च काव्यमिदं समाप्यते। ततः काव्यारम्भे युधिष्टिरस्य प्रस्तावः वर्तते। पुनः कथायाः समाप्तिमपि धर्मसूनवे समर्पितेन नमस्कारेण कथां

---

[10] कुमारसम्भवम् ८/९१
[11] ननमयय
[12] किरातार्जुनीयम् (१८/४७)
[13] ननमयय

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:10(5), October, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

समापयति। पञ्चमहाकाव्येषु इदमेकं काव्यम् आख्यातपदेन च समाप्तिमेति। पुनश्च मनसि वीरस्य विनयभावं ज्ञापयति। तेन श्लोकावगमने महत्सौलभ्यं दृश्यते। तत्र धृतगुरुजयलक्ष्मीः इति विशेषणेन अर्जुनस्य कार्यसाधकतां विदधत् तेन कथायाः समाप्तिः सलक्ष्यमिति च सूचयन् समापयति। अथ इत्यस्यापि प्रयोगः दृश्यते। यत्सामान्ये मङ्गलाचरणसूचकं नास्ति। अनन्तरार्थे प्रयुक्तः। तत्र च अनुप्रासालङ्कारोऽपि सुष्ठुप्रयुक्तः वीररसपोषकः। ननामेति कथने विनयः। अयमपि कविः कालिदसस्य कुमारसम्भवमिव मालिनीवृत्तेन काव्यमसमापयत्।

## शिशुपालवधम्

**आदिमः श्लोकः**

**श्रियः पतिः श्रीमति शासितुं जगज्जगन्निवासो वसुदेवसद्मनि।**

**वसन्ददर्शावतरन्तमम्बराद्धिरण्यगर्भाङ्गभुवं मुनिं हरिः ॥**

वंशस्थवृत्ते[14] वर्तते। इदमपि काव्यं श्रीपदेनारभते। "तत्रादौ श्रीशब्दप्रयोगात् वर्णगणादिशुद्धेरभ्युच्चयः। तदुक्तम्- 'देवतावाचकाः शब्दा ये च भद्रादिवाचकाः। ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा ॥' इति मल्लिनाथः। पदेनैकेनात्र मङ्गलमुक्त्वा कथारम्भं करोति। भारविरिव अस्यापि काव्यस्य प्रारम्भः। लक्ष्म्याः पतिः लक्ष्मीयुते सद्मनि जगत् शासितुं दुष्टनिग्रहशिष्टानुग्रहाभ्यां नियन्तुं वसन्निति आरभते। "अत्राल्पीयसि वसुदेवसद्मनि सकलजगदाश्रयतया महीयसो हरेराधेयत्वकथनाद- धिकप्रभेदोऽर्थालंकारः। तदुक्तम्-'आधाराधेययोरानुरूप्याभावोऽधिको मतः' इति। जगन्निवासस्य जगदेकदेशनिवासित्वमिति विरोधश्च। तथा तकारसकारादेः केवलस्यासकृदावृत्त्या जगज्जगदिति सकृद्व्यञ्जनद्वयसादृश्याच्च वृत्त्यनुप्रासभेदौ शब्दालंकारौ। एषां चान्योन्यनैरपेक्ष्येणैकत्र समावेशात्तिलतण्डुलवत्संसृष्टिः।" इति मल्लिनाथः।

**अन्तिमः श्लोकः**

**श्रिया जुष्टं दिव्यैः सपटहरवैरन्वितं पुष्पवर्षैर्वपुष्टचैद्यस्य क्षणमृषिगणैः स्तूयमानं निरीय।**

**प्रकाशेनाकाशे दिनकरकरान्विक्षिपद्विस्मिताक्षैर्नरेन्द्रैरौपेन्द्रं वपुरथ विशद्धाम वीक्षांबभूवे ॥[15]**

काव्यस्यान्तमपि श्रीशब्देन कृतः। इदमस्य काव्यस्य वैशिष्ट्यम्। मेघविस्फूर्जिता छन्दः[16] प्रयुक्तः। छन्दसः प्रयोगः शब्दानां च प्रयोगः मेघगर्जनमिव भासेते। छेकस्य वृत्त्यनुप्रासस्य च प्रयोगः दृश्यत एव। शीकृष्णेन हतः शिशुपालः विष्णुधाम प्राविशदिति। अत्र फलश्रुतिरूपेण नारायणस्वरूपस्य श्रीकृष्णस्य तद्भक्तानां प्रति औदार्यं दर्श्यते। "सूर्यसहस्राभिभाविनः शिशुपालतेजसो हरिशरीरप्रवेशवृत्तान्तस्या-लौकिकस्याद्भुतस्य प्रत्यक्षलक्ष्यमाणत्वा- भाविकालंकारः। तदुक्तम्-'विनापराधेन कृतार्थकं विना भाविकं तदुदाहृतम्' इति।" मल्लिनाथः।

## नैषधीयचरितम्

**आदिमः श्लोकः**

**निपीय यस्य क्षितिरक्षिणः कथाः तथाद्रियन्ते न बुधाः सुधामपि।**

---

14 जतजर
15 शि.व. २०/७१
16 यमनसररग

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:10(5), October, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

Cover Page

**नलः सितच्छत्रितकीर्तिमण्डलः स राशिरासीन्महसां महोज्ज्वलः॥**[17]

वंशस्थवृत्ते वर्ततेऽयं श्लोकः। अत्रापि कथापसङ्गः साक्षाद्दृश्यते। नलस्यकीर्तिः महोज्ज्वला अवर्तत इति कथनेन तथा च तस्य नलस्य कथायाः आदरं च स्तुवन् अव्यय पदेनारभते। अव्ययमिति पदस्य वैयाकरणसंज्ञा वर्तत एव। परं परमात्मनः अनन्तेषु नामसु "अव्ययः"[18] इत्यपरं। तथाऽत्र परमात्वस्वरूपस्य अव्ययत्वस्य स्मरणं तेन पदेन। तथा च वस्तुनिर्देशेन कथामुखमत्र विहितम्। अतिशयोक्त्यलङ्कारेणारम्भः। अस्य क्षितिरक्षिणः कथाः निपीय बुधाः अमृतमपि नाद्रियन्ते इति स्वकाव्यस्य वैशिष्ट्यं कथायाश्च वैशिष्ट्यं प्रतिपादयति।

**अन्तिमः श्लोकः**

**ताम्बूलद्वयमासनं च लभते यः कान्यकुब्जेश्वराद्यः साक्षात्कुरुते समाधिषु परं ब्रह्म प्रमोदार्णवम्।**

**यत्काव्यं मधुवर्षि धर्षितपरास्तर्केषु यस्योक्तयः श्रीश्रीहर्षकवेः कृतिः कृतिमुदे तस्याभ्युदीयादियम्॥**[19]

शार्दूलविक्रीडिते[20] छन्दसि विद्यतेऽयं श्लोकः। कविरयं सर्वस्य सर्गस्यान्ते स्वरचनायां वैशिष्ट्यं कथयन् "श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।" इति समापयति अन्तिमे सर्गे ताम्बूलद्वयमिति श्लोकेन समापयति। तत्र स्वस्य राजाश्रयत्वम् आध्यात्मिकता च स्मर्यते। परब्रह्मसाक्षात्कारेण प्रमोदार्णं साक्षात्कृत इत्यपि स्वयं कथयति। येन स योगीति ज्ञायते। सकलविद्यापारङ्गतः कविरयं कवि शब्दस्य अन्वर्थतामुदाहरति। काव्येऽस्मिन् स्वतर्कैः मतमातान्तराणां खण्डनं चकार। ग्रन्थान्तरेषु च तथा चकार। इत्थं श्रीहर्षः स्वकाव्यमुदीयादिति आशास्ते। तस्मात्पूर्वं विद्वद्भिरेवेदं काव्यं ग्राह्यते न तु पामरैरित्यपि कथयति। सहृदयेभ्यः मधुवर्षि काव्यमिदमिति वदन् एवं श्रीहर्षस्य काव्ये उद्धता या दृश्यते तदत्र श्लोके प्रकटयति च।

**उपयुक्तग्रन्थसूची**

१. किरातार्जुनीयम्। भारविविरचितम्, मल्लिनाथकृतघण्टापथ-व्याख्योपेतम्। सम्पादकः डा. सुधाकरमालवीयः। प्रकाशकाः – चौखम्बा संस्कृत प्रतिष्ठान, वाराणसी। वि.सं. २०७१

२. रघुवंशमहाकव्यम्। कालिदासविरचितम्, मल्लिनाथकृतसञ्जीवनी व्याख्योपेतम् ।सम्पादकः श्री. पं. रामचन्द्र झा, व्याकरणाचार्यः। प्रकाशकाः – चौखम्बा संस्कृत प्रतिष्ठान, वाराणसी। वि.सं. २०६९

३. शिशुपालवधम्। माघविरचितम्, मल्लिनाथकृतसर्वङ्कषाव्यख्यायुतम्।सम्पादकः डा. गजाननशास्त्री। प्रकाशकाः – चौखम्बा संस्कृतभवन , वाराणसी। वि.सं. २०६९

४. नैषधीयचरितम्। श्रीहर्षविरचितम्। मल्लिनाथकृतजीवातुव्याख्योपेतम्। प्रकाशकाः – चौखम्बा संस्कृत प्रतिष्ठान, वाराणसी। वि.सं. २०६७

५. काव्यादर्शः https://www.sanskrit.nic.in/DigitalBook/K/Kavyadarshdandi.pdf

६. छन्दोमञ्जरी https://archive.org/details/chando_manjari_hindi

17 नै. च. १/१
18 अव्ययः पुरुषस्साक्षी क्षेत्रज्ञोक्षर एव च। इति।
19 नै. च. २२/१५३
20 मसजसततग।